श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमत् मैसूर् आण्डवन् श्री श्रीनिवासरामानुजमहादेशिकैः अनुगृहीता

# ॥ श्री श्रीनिवासाष्टोत्तरशतनामस्तुतिः ॥

*This document*[*] *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासाष्टोत्तरशतनामस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनिवासो वासुदेवो लक्ष्मीशः पुरुषोत्तमः।
अचिन्त्यानन्तविभवो भावाभावविभावनः॥ १ ॥

अहंभावात्मभावात्मा शान्तानन्तविभूतिकः।
परंब्रह्म व्यक्तभासः लीलालोलजगन्मयः॥ २ ॥

सर्वाधारः कामदोग्धा सर्वशक्तो विमुक्तिदः।
आद्यन्तरहितो देवः सर्वकार्यैककारणः॥ ३ ॥

सर्वाङ्गसुन्दरः सर्वव्यापको भवतारकः।
हिरण्यवर्णो हैरण्यप्राकारो वेदगोचरः॥ ४ ॥

मनोज्ञेयो ज्ञानगम्यो नित्यमुक्तात्मसेवितः।
निर्विकल्पो महानन्दः महामायो महौषधिः॥ ५ ॥

शुभावहो नित्यतुष्टः परमात्मा जगन्निधिः।
विद्याप्रियः सुप्रसन्नः सर्वगन्धो मनोहरः॥ ६ ॥

सामप्रियः सर्वसेव्यः शुभरेखः चतुर्भुजः।
भक्तजुष्टो नित्यपुष्टः निरुपाधिः महाबलः॥ ७ ॥

अक्षोभ्यः सर्वतोभद्रः निर्भयः समदर्शनः।
स्तुतिप्रियः त्रिकालस्थः सर्वाकारो महोदयः॥ ८ ॥

भोगप्रियो दयाम्भोधिः शान्तिदो भक्तवत्सलः।
नारायणो दीर्घबन्धुः वक्षोलक्ष्मीविलासवान्॥ ९ ॥

सर्वदोषप्रशमनः सर्वाभीष्टप्रदायकः।
सर्वपापप्रशमनः सर्वसौभाग्यदायकः॥ १० ॥

योगप्रियः योगिसेव्यः शरण्यो योगसिद्धिदः।
पुण्यावासः सत्यरतः हृदयस्थफलप्रदः॥ ११ ॥

देवश्रीशः वेदमेशः महाश्रीशो द्विजप्रियः।
ब्रह्मश्रीशः पुण्यरूपः योगीशः सात्विकप्रियः॥ १२ ॥

सीताकान्तः शमोपघ्नः रुक्माभः प्रियदर्शनः।
क्षेमदः सत्यभामेशः धरेशो यज्ञदक्षिणः॥ १३ ॥

विष्णुक्रान्तो रथक्रान्तः वाराहः सर्वसाक्षिकः।
सुदर्शनो यज्ञगर्भः साधुत्रो रत्नपादुकः॥ १४ ॥

दुस्स्वप्नदुष्फलहरः शुभाङ्गो वसुधाप्रियः।
श्रेयस्करो देवदेवः सुवीरो दुष्टमर्दनः॥ १५ ॥

भास्करो ज्ञानचक्रेशः स्वस्तिदः श्रेयसां निधिः।
पद्मावतीसहचरः भोगीन्द्रशयनप्रियः॥ १६ ॥

शान्तिप्रियो महाविष्णुः ज्ञानदः स्फूर्तिदायकः।
सर्वलक्षणलक्षण्यः सर्वलोकप्रियङ्करः॥ १७ ॥

सर्वलोकैकशरणः सर्वलोकेष्टदायकः।
एवं स्वाभीष्टदैः श्लोकैः स्तुतः श्रीशो ददाति शम्॥ १८ ॥

नमोऽस्त्वाचार्यपादाभ्यां महालक्ष्म्यै नमो नमः।
प्रणमामि प्रणौमि त्वां महाविष्णो! प्रसीद मे॥ १९ ॥

॥ इति श्री श्रीनिवासाष्टोत्तरशतनामस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥